# दीक्षा संस्कार

## एवं

# यज्ञोपवीत

**महिला मण्डल**

गायत्री तीर्थ–शान्तिकुंज, हरिद्वार

ॐ भूर्भुवः स्वः
तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ।

ॐ ब्रह्मानन्दं परम सुखदं केवलं ज्ञानमूर्तिं,
द्वन्द्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम्।
एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं,
भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि॥१॥
अखण्डानन्दबोधाय शिष्यसंतापहारिणे।
सच्चिदानन्दरूपाय तस्मै श्री गुरवे नमः॥ २॥
लक्ष्मीर्मेधा धरापुष्टिः, गौरी तुष्टिः प्रभा धृतिः।
एताभिः पाहि तनुभिः, अष्टाभिर्मां सरस्वति॥ १॥
सरस्वत्यै नमो नित्यं, भद्रकाल्यै नमो नमः।
वेद वेदान्तवेदाङ्ग, विद्यास्थानेभ्य एव च॥ २॥
मातस्त्वदीयपदपङ्कज - भक्तियुक्ता,
ये त्वां भजन्ति निखिलानपरान्विहाय।
ते निर्जरत्वमिह यान्ति कलेवरेण,
भूवह्निवायुगगनाम्बुविनिर्मितेन॥ ३॥
व्यासाय विष्णुरूपाय, व्यासरूपाय विष्णवे।
नमो वै ब्रह्मनिधये, वासिष्ठाय नमो नमः॥१॥
नमोऽस्तु ते व्यास विशालबुद्धे, फुल्लारविन्दायतपत्रनेत्र।
येन त्वया भारततैलपूर्णः, प्रज्वालितो ज्ञानमयः प्रदीपः॥ २



आर्यावर्त्तैक देशान्तर्गते, ..................... क्षेत्रे,
मासानांमासोत्तमेमासे......मासे......पक्षे......तिथौ......वासरे.....
गोत्रोत्पन्नः...... .नामाऽहं श्रुतिस्मृतिपुराणोक्त-फलप्राप्त्यर्थं मम कायिक-वाचिक मानसिक ज्ञाताज्ञात-सकल दोष निवारणार्थं, आत्मकल्याण-लोककल्याणार्थं- गायत्री महाविद्यायां श्रद्धापूर्वकं दीक्षितो भवामि। तन्निमित्तकं युगऋषि वेदमूर्ति तपोनिष्ठ परम पूज्य गुरुदेव पं. श्रीराम शर्मा आचार्येण, वन्दनीया माता भगवती देवी शर्मणा च निर्धारितानि अनुशासनानि स्वीकृत्य, तयोः प्राणतपः पुण्यांशं स्वान्तः करणे दधामि, तस्साधयितुं च समयप्रतिभा-साधनानां एकांशं.........नवनिर्माणकार्येषु प्रयोक्तुम् गुरुदक्षिणायाः संकल्पं अहं करिष्ये॥

## ॥ विसर्जनम्॥

ॐ यान्तु देवगणाः सर्वे, पूजामादाय मामकीम्।
इष्टकामसमृद्ध्यर्थं, पुनरागमनाय च॥

## ॥ शांतिपाठ॥

ॐ द्यौः शान्तिरन्तरिक्ष ७ँ शान्तिः, पृथिवी शान्तिरापः, शान्ति-रोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वेदेवाः, शान्तिर्ब्रह्म शान्तिः, सर्व ७ँ शान्तिः, शान्तिरेव शान्तिः, सा मा शान्तिरेधि॥
ॐ शान्तिः, शान्तिः, शान्तिः॥ सर्वारिष्टसुशान्तिर्भवतु।

ॐ श्री गुरवे नमः। आवाहयामि, स्थापयामि, ध्यायामि॥

ततो नमस्कारं करोमि।

ॐ वन्दे बोध मयं नित्यं, गुरुं शंकररूपिणम्।
यमाश्रितो हि वक्रोऽपि, चन्द्रःसर्वत्र वन्द्यते॥

अज्ञानतिमिरान्धस्य, ज्ञानांजनशलाकया।
चक्षुरुन्मीलितं येन, तस्मै श्री गुरवे नमः॥

नमोऽस्तु गुरवे तस्मै, गायत्री रूपिणे सदा।
यस्य वागमृतं हन्ति, विषं संसारसंज्ञकम्॥

मातृवत् लालयित्री च, पितृवत् मार्गदर्शिका॥
नमोऽस्तु गुरुसत्तायै, श्रद्धाप्रज्ञायुता च या॥

## ॥ मंत्र दीक्षा॥

ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्॥

## ॥ सिंचन-अभिषेक॥

ॐ आपो हिष्ठा मयोभुवः, तानऽऊर्जे दधातन। महे रणाय चक्षसे।
ॐ यो वः शिवतमो रसः, तस्य भाजयतेह नः।
उशतीरिव मातरः। ॐ तस्माऽअरं गमाम वो, यस्य क्षयाय जिन्वथ।
आपोजनयथा च नः।

## ॥ संङ्कल्पः॥

ॐ विष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य, अद्य श्रीब्रह्मणो द्वितीये परार्धे श्रीश्वेतवाराहकल्पे, वैवस्वतमन्वन्तरे, भूर्लोके, जम्बूद्वीपे, भारतवर्षे, भरतखण्डे



## ॥ पवित्रीकरणम् ॥

ॐ अपवित्रः पवित्रो वा, सर्वावस्थां गतोऽपि वा।
यः स्मरेत्पुण्डरीकाक्षं, स बाह्याभ्यन्तरः शुचिः॥
ॐ पुनातु पुण्डरीकाक्षः, पुनातु पुण्डरीकाक्षः, पुनातु।

ॐ पवित्रे स्थो वैष्णव्यौ सवितुर्वः, प्रसवऽउत्पुनाम्यच्छिद्रेण, पवित्रेण सूर्यस्य रश्मिभिः। तस्य ते पवित्रपते पवित्रपूतस्य, यत्कामः पुने तच्छकेयम्म॥

ॐ पुनाति ते परिस्रुत ७, सोम ७ सूर्यस्य दुहिता।
वारेण शश्वता तना।
ॐ पुनन्तु मा देवजनाः, पुनन्तु मनसा धियः।
पुनन्तु विश्वा भूतानि, जातवेदः पुनीहि मा।
ॐ यत्ते पवित्रमर्चिषि, अग्ने विततमन्तरा। ब्रह्म तेन पुनातु मा॥
ॐ पवमानः सो अद्य नः, पवित्रेण विचर्षणिः।
यः पोता स पुनातु मा।
ॐ उभाभ्यां देव सवितः, पवित्रेण सवेन च। माँ पुनीहि विश्वतः॥

## ॥ प्राणायामः॥

ॐ भूः ॐ भुवः ॐ स्वः ॐ महः, ॐ जनः ॐ तपः ॐ सत्यम्।
ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रयोदयात्।
ॐ आपोज्योतिरसोऽमृतं, ब्रह्म भूर्भुवः स्वः ॐ।॥

## ॥ पृथ्वी पूजनम्॥

ॐ पृथ्वि! त्वया धृता लोका, देवि! त्वं विष्णुना धृता।
त्वं च धारय मां देवि! पवित्रं कुरु चासनम्॥

## ॥ चन्दनधारणम् ॥

ॐ चन्दनस्य महत्पुण्यं, पवित्रं पापनाशनम्।
आपदां हरते नित्यं, लक्ष्मीस्तिष्ठति सर्वदा॥
ॐ अक्षन्नमीमदन्त ह्यव प्रियाऽ अधूषत। अस्तोषत
स्वभानवोविप्रा, नविष्ठया मती योजान्विन्द्र ते हरी॥
ॐ स्वस्ति नऽ इन्द्रो वृद्धश्रवाः, स्वस्ति नः पूषा विश्ववेदा।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः, स्वस्तिनो बृहस्पतिर्दधातु।
ॐ गन्धद्वारां दुराधर्षां, नित्यपुष्टां करीषिणीम्।
ईश्वरीं सर्वभूतानां, तामिहोपह्वये श्रियम्॥
ॐ दीर्घायुत्वाय बलाय वर्चसे, सुप्रजास्त्वाय सहसा,
अथोजीव शरदः शतम्॥

## ॥ रक्षासूत्रम् ॥

ॐ व्रतेन दीक्षामाप्नोति, दीक्षयाऽऽप्नोति दक्षिणाम्।
दक्षिणा श्रद्धामाप्नोति, श्रद्धया सत्यमाप्यते॥
ॐ यदाबध्नन्दाक्षायणा हिरण्य ७ ,शतानीयकाय सुमनस्य मानाः।
तन्मऽ आबध्नामि शत शारदाय, आयुष्मांजरदष्टिर्यथासम्म॥
ॐ येन बद्धो बलीराजा, दानवेन्द्रो महाबलः
तेन त्वां प्रति बध्नामि, रक्षे मा चल मा चल॥



(2) विष्णु-

ॐ इदं विष्णुर्विचक्रमे, त्रेधा निदध पदम्। समूढमस्य पा ७ सुरे-
स्वाहा। ॐ विष्णवे नमः। आवाहयामि, स्थापयामि, ध्यायामि।

(3) महेश-

ॐ नमस्ते रुद्र मन्यवऽ, उतो तऽइषवे नमः। बाहुभ्यामुत ते नमः।
ॐ रुद्राय नमः। आवाहयामि, स्थापयामि, ध्यायामि।

(4) यज्ञ-

ॐ यज्ञेन यज्ञमयजन्त देवाः तानि धर्माणि प्रथमान्यासन्। ते ह
नाकं महिमानः सचन्त, यत्र पूर्वे साध्याः सन्ति देवाः।
ॐ यज्ञपुरुषाय नमः। आवाहयामि, स्थापयामि, ध्यायामि।

(5) सूर्य-

ॐ आकृष्णेन रजसा वर्त्तमानो, निवेशयन्नमृतं मर्त्यं च। हिरण्ययेन
सविता रथेना, देवो याति भुवनानि पश्यन्॥
ॐ सूर्याय नमः। आवाहयामि, स्थापयामि, ध्यायामि।

## ॥ यज्ञोपवीत धारणम्॥

ॐ यज्ञोपवीतं परमं पवित्रं, प्रजापतेर्यत्सहजं पुरस्तात्।
आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं, यज्ञोपवीतं बलमस्तु तेजः॥

## ॥ गुरु पूजन॥

ॐ बृहस्पते ऽअति यदर्यो, अर्हाद् द्युमद्विभाति क्रतुमज्जनेषु।
यद्दीदयच्छवसऽ ऋतप्रजात, तदस्मासु द्रविणं धेहि चित्रम्।
उपयामगृहीतोऽसि बृहस्पतये, त्वैष ते योनिर्बृहस्पतये त्वा।

पश्चिमे चैव गोविन्दो, वायव्यां तु जनार्दनः।
उत्तरे श्रीपती रक्षेद्, ऐशान्यां हि महेश्वरः ॥२॥
ऊर्ध्वं रक्षतु धाता वो, ह्यधोऽनन्तश्च रक्षतु।
अनुक्तमपि यत् स्थानं, रक्षत्वीशो ममाद्रिधृक् ॥३॥
अपसर्पन्तु ते भूता, ये भूता भूमिसंस्थिताः।
ये भूता विघ्नकर्तारः, ते गच्छन्तु शिवाज्ञया ॥४॥
अपक्रामन्तु भूतानि, पिशाचाः सर्वतो दिशम्।
सर्वेषामविरोधेन, दीक्षाकर्म समारभे ॥५॥

## यज्ञोपवीत संस्कार/दीक्षा प्रकरण ॥

**(शांतिकुंज परिचय, गुरु परिचय, दीक्षा, यज्ञोपवीत भूमिका)**

### ॥ यज्ञोपवीत पूजन ॥

ॐ मनोजूतिर्जुषतामाज्यस्य, बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं, यज्ञ ꣳ समिमं दधातु। विश्वेदेवासऽइह मादयन्तामो३म्प्रतिष्ठ ॥

### ॥ पंच देवावाहनम् ॥

(1) ब्रह्मा-

ॐ ब्रह्म जज्ञानं प्रथमं पुरस्ताद्, विसीमतः सुरुचो वेनऽआवः।
सबुध्न्या ऽउपमा ऽ अस्य विष्ठाः, सतश्च योनिमसतश्च विवः॥
ॐ ब्रह्मणे नमः। आवाहयामि, स्थापयामि, ध्यायामि।



### ॥ कलशपूजनम् ॥

ॐ तत्त्वायामि ब्रह्मणा वन्दमानः, तदाशास्ते यजमानो हविर्भिः।
अहेडमानो वरुणेह बोध्युरुश ꣳ, समानऽआयुः प्रमोषीः॥
ॐ मनोजूतिर्जुषतामाज्यस्य, बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं, यज्ञ ꣳ
समिमं दधातु। विश्वेदेवासऽइह मादयन्तामो३म्प्रतिष्ठ॥
ॐ वरुणायनमः। आवाहयामि, स्थापयामि, ध्यायामि।
गन्धाक्षतं, पुष्पाणि, धूपं, दीपं, नैवेद्यं समर्पयामि।
ॐ कलशस्थ देवताभ्योनमः॥

### ॥ दीपपूजनम् ॥

ॐ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा। सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा। अग्निर्वर्च्चो ज्योतिर्वर्च्चः स्वाहा। सूर्यो वर्च्चो ज्योतिर्वर्च्चः स्वाहा। ज्योतिः सूर्य्यः सूर्य्यो ज्योतिः स्वाहा। ॐ ज्योर्तिपुरुषाय नमः आवाहयामि, स्थापयामि, ध्यायामि।

### ॥ देवावाहनम् ॥

ॐ गुरुर्ब्रह्मा गुरुर्विष्णुः, गुरुरेव महेश्वरः।
गुरुरेव परब्रह्म, तस्मै श्री गुरवे नमः॥ १ ॥
अखण्डमण्डलाकारं, व्याप्तं येन चराचरम्।
तत्पदं दर्शितं येन, तस्मै श्री गुरवे नमः॥ २ ॥ -गु०गी० ४३,४५
मातृवत् लालयित्री च, पितृवत् मार्गदर्शिका।
नमोऽस्तु गुरुसत्तायै, श्रद्धा-प्रज्ञायुता च या॥ ३ ॥
ॐ श्री गुरवे नमः। आवाहयामि, स्थापयामि, ध्यायामि।

**गायत्री-**

वेदमाता, देवमाता, विश्वमाता-सद्ज्ञान, सद्भाव की अधिष्ठात्री सृष्टि की आदिकारण मातेश्वरी।

ॐ आयातु वरदे देवि! त्र्यक्षरे ब्रह्मवादिनि।
गायत्रिच्छन्दसां मातः, ब्रह्मयोने नमोऽस्तु ते॥ ४॥ -सं०प्र०

ॐ श्री गायत्र्यै नमः। आवाहयामि, स्थापयामि, ध्यायामि।
ततो नमस्कारं करोमि।

ॐ स्तुता मया वरदा वेदमाता, प्रचोदयन्तां पावमानी द्विजानाम्। आयुः प्राणं प्रजां पशुं, कीर्तिं द्रविणं ब्रह्मवर्चसम्। मह्यं दत्त्वा व्रजत ब्रह्मलोकम्। -अथर्व० १९.७१.

## ॥ सर्वदेवनमस्कारः ॥

ॐ सिद्धि बुद्धिसहितायय श्रीमन्महागणाधिपतये नमः।
ॐ लक्ष्मीनारायणाभ्यां नमः। ॐ उमामहेश्वराभ्यां नमः।
ॐ वाणीहिरण्यगर्भाभ्यां नमः। ॐ शचीपुरन्दराभ्यां नमः।
ॐ मातापितृचरणकमलेभ्यो नमः। ॐ कुलदेवताभ्यो नमः।
ॐ इष्टदेवताभ्यो नमः। ॐ ग्रामदेवताभ्यो नमः।
ॐ स्थानदेवताभ्यो नमः। ॐ वास्तुदेवताभ्यो नमः।
ॐ सर्वेभ्यो देवेभ्यो नमः। ॐ सर्वेभ्यो ब्राह्मणेभ्यो नमः।
ॐ सर्वेभ्यस्तीर्थेभ्यो नमः।
ॐ एतत्कर्म-प्रधान-श्री गायत्रीदेव्यै नमः।
ॐ पुण्यं पुण्याहं दीर्घमायुरस्तु।



## ॥ स्वस्तिवाचनम्॥

ॐ गणानां त्वा गणपति थ्ठं हवामहे, प्रियाणां त्वा प्रियपति थ्ठं हवामहे, निधीनां त्वा निधिपति थ्ठं हवामहे, वसोमम। आहमजानि गर्भधमा त्वमजासि गर्भधम्॥

ॐ स्वस्ति न ऽइन्द्रो वृद्धश्रवाः, स्वस्ति नः पूषा विश्ववेदाः।
स्वस्ति नस्तार्क्ष्योऽअरिष्टनेमिः, स्वस्ति नो बृहस्पतिर्दधातु।

ॐ पयः पृथिव्यां पयऽओषधीषु, पयो दिव्यन्तरिक्षे पयोधाः।
पयस्वतीः प्रदिशः सन्तु मह्यम्॥

ॐ विष्णो रराटमसि विष्णोः, श्नप्त्रे स्थो विष्णोः, स्यूरसि विष्णोर्ध्रुवोऽसि, वैष्णवमसि विष्णवे त्वा॥

ॐ अग्निर्देवता वातो देवता, सूर्यो देवता चन्द्रमा देवता, वसवो देवता रुद्रा देवता, ऽऽदित्या देवता, मरुतो देवता, विश्वेदेवा देवता, बृहस्पतिर्देवतेन्द्रो देवता, वरुणो देवता॥

ॐ द्यौः शान्तिरन्तरिक्ष थ्ठं शान्तिः, पृथिवी शान्तिरापः, शान्ति-रोषधयःशान्तिः। वनस्पतयः शान्तिर्विश्वेदेवाः, शान्तिर्ब्रह्म शान्तिः, सर्व थ्ठं शान्तिः, शान्तिरेव शान्तिः, सा मा शान्तिरेधि॥

ॐ विश्वानि देव सवितर्दुरितानि परासुव। यद्भद्रं तन्नऽआ सुव।

ॐ शान्तिः, शान्तिः, शान्तिः॥ सर्वारिष्टसुशान्तिर्भवतु।

## ॥ रक्षाविधानम्॥

ॐ पूर्वे रक्षतु वाराहः, आग्नेय्यां गरुडध्वजः।
दक्षिणे पद्मनाभस्तु, नैर्ऋत्यां मधुसूदनः॥१ ॥